# संस्कृतवार्ता:

दिनाङ्क :  01/09/2025                                                                     सायम्  - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना आतङ्ककवादं विरुध्य कृतं वैश्विक एकताया: आह्वानम्। अमुना चीन-देशे आयोजिते शंघाई-सहयोग-संघटनस्य शिखर-सम्मेलने प्रोक्तं यत् आतंकवादे मापदण्ड-द्वयम् अस्वीकार्यम्।
- एस.सी.ओ. घोषणा-पत्रे पहलगाम-आतङ्क्याक्रमणस्य कट्वालोचना कृता। सहैव आतङ्कवादं विरुध्य प्रदत्त: संयुक्त-सन्देश:; सदस्य-देशै: क्षेत्रीय-सहयोगेषु, नवाचारेषु च भारतस्य वर्धमानं योगदानं मान्यतां नीतम्।
- भारतीय-ऋतु-विज्ञान-विभागेन अद्य हिमाचल-प्रदेशस्य उत्तराखण्डस्य च कतिपय स्थानेषु कृता प्रचण्ड-वृष्टे: भविष्यवाणी।
- अफगानिस्तानस्य कुनार-प्रान्ते समागते भीषण-भूकम्पे न्यूनान्-न्यूना: अष्टशतं जना: मृता:, सार्ध-द्वि-सहस्रं जनाश्च सूच्यन्ते व्रणिता:।

---

<u>प्रधानमन्त्री – एस.सी.ओ. शिखरसम्मेलनम्</u>

प्रधानमन्त्री श्रीनरेन्द्र मोदी अद्य प्रावोचत् यत् आतंकवाद-विषये मानदण्ड-द्वयम् अस्वीकार्यमस्ति। चीनस्य **तियानजिन-**मध्ये आयोजिते एस.सी.ओ. इति **शंघाई-सहयोग-संघटनस्य** शिखर-सम्मेलने निजे वक्तव्ये प्रधानमन्त्री मोदी आतंकवाद: मानवतायै एकं बृहत्

समाह्वानम् अस्ति इति प्रत्यपादयत्। असौ प्रोक्तवान् यत् आतंकवादस्य सर्वाणि अपि रूपाणि निन्दनीयानि सन्ति। श्रीमोदी न्यगादीत् यत् भारतं विगतेभ्य: चतुर्भ्यः दशकेभ्यः आतंकवादस्य समस्यां सम्मुखीकुरुते। अत्रावसरे अमुना पहलगाम आतंक्याक्रमणस्य अनन्तरं भारतेन साकं ऐक्यबद्धता-प्रकटन-परेभ्य: सर्वेभ्य: देशेभ्य: आभारभार: अपि व्यक्तीकृतः।

प्रधानमन्त्री एतस्मिन् विषये सबलं प्रोक्तवान् यत् भारतं एस.सी.ओ. इति शंघाई-सहयोग-संघटनस्य सदस्यत्वेन सर्वदैव सकारात्मक-भूमिकां निर्वहति। असौ अग्रे अवदत् यत् भारतस्य दृष्टि: नीतिश्च त्रिषु प्रमुख-स्तम्भेषु – सुरक्षा, सम्पर्क: अवसरश्चेत्येतेषु आधारिता अस्ति।

प्रधानमन्त्री मोदी शिखर-सम्मेलनस्य अवसरे रूस-देशीय-राष्ट्रपतिना **व्लादिमीर पुतिन** इत्यमुना, चीन-देशीय-राष्ट्रपतिना च **शी जिनपिंग** इत्यनेन साकमपि विचार-विनिमयं विहितवान्।

---

**प्रधानमन्त्रिमोदिपुतिनयो: सम्भाषणम्**

प्रधानमन्त्री नरेन्द्रमोदी रूस-राष्ट्रपति: **व्लादिमीर पुतिनश्च** अद्य द्विपक्षीय-सहयोग-विषये चर्चां कृतवन्तौ, यत्र खलु वित्तीय-क्षेत्राणि, ऊर्जा-क्षेत्राणि च समाविष्टानि आसन्। उभाभ्यामपि नेतृभ्यां एतेषु क्षेत्रेषु निरन्तरं समेधमानानां द्विपक्षीय-सम्बन्धानां प्रसंगे सन्तोष: प्रकटित:। चीनस्य **तियानजिन**-मध्ये आयोजितात् एस.सी.ओ. शिखर-सम्मेलनात् पृथक् उभावपि नेतारौ द्वै-पाक्षिकं मन्त्रणोपवेशनम् आचरितवन्तौ।

उभाभ्यामपि नेतृभ्यां क्षेत्रीय-विषयेषु वैश्विक-विषयेषु चापि परिचर्चा विहिता, यत्र हि यूक्रेन-सम्बद्धाः घटनाक्रमा: अपि सम्मिलिताः आसन्। द्वावपि नेतारौ **"विशिष्टं विशेषाधिकार-प्राप्तं**

**च कार्यनीतिकं साहमत्यम्"** अतोऽपि सुदृढीकर्तुं नैजं समर्थनं साम्रेडितवन्तौ। प्रधानमन्त्री मोदी राष्ट्रपतये **पुतिनाय** इदमपि सन्दिष्टवान् यत् स: अस्य वर्षस्य अवसाने भारते आयोक्ष्यमाणे त्रयोविंशे वार्षिक-शिखर-सम्मेलने तस्य स्वागतार्थं प्रतीक्षापरः वर्तते।

स्वीये उद्घाटन-वक्तव्ये श्रीमोदी उक्तवान् यत् भारत-रूस-देशौ सर्वदा कठिने प्रतिकूल-समयेऽपि स्कन्धेन स्कन्धं संयोज्य मिलित्वा स्थितौ वर्तेते। अनेन प्रोक्तं यत् उभयो: देशयो: निकटता सहयोगार्थं विश्व-शान्ति-सन्धारणार्थं, स्थिरतायै, समृद्धये चापि महत्वपूर्णा वर्तते। प्रधानमन्त्री प्रोदैरयत् यत् नव दिल्ली मॉस्को च निरन्तरं यूक्रेन-संघर्षे चर्चारतौ स्त:। असौ सद्यो विहितानां सर्वेषामपि शान्ति-सन्धारण-प्रयासानां स्वागतमपि कृतवान्। साकमेव मोदिना विषयम् अमुं सन्दृभ्य आशाभिव्यक्ता यत् सर्वेऽपि पक्षा: रचनात्मक-रूपेण अग्रे वर्धिष्यन्ते। अत्रान्तरे, प्रधानमन्त्री चीनस्य यात्रां सम्पाद्य दिल्लीं प्रतिनिवृत्त: अस्ति ।

---

## एस.सी.ओ. घोषणा

शंघाई- सहयोग संघटनस्य घोषणायां पहलगाम-आतङ्क्याक्रमणस्य भृशं भर्त्सना विहितास्ति। साकमेव आतंकवादं विरुध्य एक: स्पष्ट: एकीभूतः संदेश: अपि प्रदत्तः अस्ति। राज्यानां परिषदाम् उपवेशनस्य अनन्तरं प्रख्यापितायां घोषणायां भारतस्य समेधमानं योगदानं क्षेत्रीय-सहयोगं नवाचारं चापि मान्यतां सन्नीता: सन्ति।

ध्येयमस्ति यत् **"तियानजिन घोषणा"** आतंकवादं विरुध्य सामूहिक-प्रयासानां सुदृढीकरण-प्रसङ्गे एक: महत्वपूर्ण: पदक्षेप: अस्ति। सहैव एषा घोषणा एस.सी.ओ. संघटनस्य अन्तर्गतं क्षेत्रीय-सहयोगस्य साकारीकरणे भारतस्य भूमिकाया: महत्त्वमपि सन्दर्शयति।

घोषणायामेतदपि साम्रेडितमस्ति यत् आतंकवादं, पार्थक्यवादम्, उग्रवादं च विरुध्य युद्धस्य प्रतिबद्धता सुदृढा अस्ति। एस.सी.ओ. देशैः भाटकेन क्रीत-समूहानाम् उपयोगः अस्वीकृतः, चरमपन्थस्य संकटानां सम्मुखीकरणे च राज्यानां संप्रभु-अधिकारे, उत्तरदायित्वे च बलं प्रदत्तम् अस्ति।

---

**ऋतु विज्ञान विभागः**

भारतीय ऋतु-विज्ञान-विभागेन हिमाचलस्य ऊनानगराय सुरक्षादृशा रक्तसञ्चेतना प्रकाशिता। ध्येयमस्ति यत् हिमाचलप्रदेशस्य हमीरपुर, बिलासपुर, कांगडा, मण्डी, सिरमौर, चेति षट्सु जनपदेषु अतिवृष्टिः समजायत। दिवस-द्वयात् अनारतं प्रवृत्तया प्रबलवृष्ट्या राज्यस्य बहुषु स्थलेषु भूस्खलनानि गृहनिपाताश्च अभवन्। अधुना यावत् तत्र भूस्खलनेन पञ्च-राष्ट्रीय-राजमार्गाः अशीत्यधिक-सप्त-शत-मार्गाश्च अवरुद्धाः। एतदतिरिच्य शताधिक-द्वि-सहस्र-मिताः ट्रांसफार्मर इत्याख्याः विद्युत्परिवर्तकाः अपि विनष्टाः सन्ति। पञ्च-षष्ट्यधिक-त्रिशत-मिताः पेयजल-योजनाः चापि बाधिताः जाताः सन्ति। वृष्टि-सम्बद्धासु घटनासु मृतकानां सङ्ख्या साम्प्रतं यावत् विंशत्यधिक-त्रिशतं जाता अस्ति। शिमलाजनपदे एव विगतासु चतुर्विंशतिहोरासु वृष्टिकारणात् भवनस्य ध्वंसनेन चत्वारः जनाः मृताः सूच्यन्ते। अत्रान्तरे अधिकारिभिः जनाः नदितीरेभ्यः दूरे भवितुं अध्यर्थिताः सन्ति।

---

**अफगानिस्तान-भूकम्पः**

अफगानिस्तानस्य कुनार-प्रान्ते समागते षट्-तीव्रतायुते भूकम्पे न्यूनान् न्यूनं अष्टशतं जनाः पञ्चतां प्राप्ताः सन्ति। तत्रैव सार्ध-द्वि-सहस्र-मिताः जनाः व्रणिताः सन्ति। अफगान-प्रशासनेन एतत् पुष्टीकृतम् अस्ति।

तत्रत्य-स्वास्थ्य-मन्त्रालयेन प्रतिपाद्यते यद् सुरक्षोद्धार-कार्यं निरन्तरं प्रवर्ततेतराम्। अथ च कुनार, नंगरहार, काबुल चेति क्षेत्रेषु चिकित्सा-दलानि भूकम्प प्रभावित-क्षेत्रेषु जनानां सहयोगार्थं प्राप्तानि सन्ति।

-----------------------------------------------

## प्रधानमन्त्री–अफगानिस्तान भूकम्प:

अत्रावसरे प्रधानमन्त्री नरेन्द्रमोदी अद्य अफगानिस्ताने भूकम्पेन सञ्जाते जनहानि-विषये शोकसंवेदनां प्राकाशयत्। प्रोक्तवान् च यत् भारतं सर्वसम्भवां मानवीयां सहायतां कर्तुं सर्वथा सर्वदा च तत्परम् अस्ति। अमुना मृतकानां परिजनान् प्रति संवेदना: प्रकाशिता:। सहैव व्रणितानां शीघ्रमेव स्वास्थ्य-लाभस्य कामनापि मोदिना कृता।

-----------------------------------------------

## अमितशाहस्य जम्मू-कश्मीर यात्रा।

केन्द्रीय-गृहमन्त्री अमित-शाह: जम्वां विक्रम-चौक-क्षेत्रं तवी-सेतुं च समेत्य तोय-प्लव-प्रभावित-क्षेत्राणां च यात्रां सम्पाद्य प्रभावित-जनानां सुरक्षोद्धार-कार्याणां समीक्षां कृतवान्। असौ तोय-प्लवेन सर्वाधिकं प्रभावितं तत्रत्यं मंगुचक-इत्याख्यं ग्रामम् अपि गमिष्यति। उपराज्यपाल: मनोज सिन्हा: उमर-अब्दुल्ला चापि तेन साकं वर्तेते। शाहेन रात्रौ एव जनधन-क्षते: निरीक्षणं कृतम्। अथ च अद्य वायवीय-सर्वेक्षण-पूर्वकं राजभवने सुरक्षोद्धार-सीमा-सुरक्षा-विषयेषु उपवेशनम् आचरिष्यति। धेयमस्ति यद् अगस्त-चतुर्दशी-त: मेघ-विस्फोटनेन तोय-प्लवस्य घटनासु किश्तवाड़, कठुआ, रियासी, रामबन चेति जनपदेषु अधुना पर्यन्तं त्रिंशदुत्तर-एक-शताधिका: जना: मृत्युमुपगता: सन्ति। त्रयस्त्रिंशत् जनाश्च विलुप्ता: सूच्यन्ते।

---

**भाजपा–कांग्रेस:**

निर्वाचनायोगे निराधाराणाम् आरोपाणाम् आरोपणम् आश्रित्य भाजपा-दलेन अद्य कांग्रेस-नेतरि राहुल-गान्धिनि निशिताः वाग्बाणाः प्रहृताः। नव-दिल्ल्यां वार्ताहरैः समं सम्भाषमाणः वरिष्ठः भाजपा-नेता रविशंकर-प्रसादः गान्धिना साकं मत-चौर्य-प्रकरणे शपथपत्रप्रदाने मौन-सन्धारण-रहस्यम् अवलम्ब्य प्रश्नम् अकरोत्। श्रीप्रसादः लोकसभायां विपक्षस्य नेतरि सशस्त्र-बलानां वीरतायां प्रश्नोत्थापनस्य, **ऑपरेशन सिंदूर** इति सैन्याभियानस्य अवसरे तेषां वीर-भटानां प्रयासानाम् अवहेलनस्य चापि आरोपान् आरोपितवान्।

---

**प्रधान-एनसीईआरटी**

केन्द्रीय-शिक्षामन्त्रिणा धर्मेन्द्रप्रधानेन शिक्षाप्रणाल्यां प्रविधेः कृत्रिमबुद्धिमत्तायाश्च अनिवार्यत्वं प्रतिपादितम्। श्रीप्रधानेन अद्य नवदिल्ल्यां राष्ट्रीय-शैक्षिकानुसन्धान-प्रशिक्षणपरिषदः पञ्चषष्टितमे स्थापनादिवससमारोहे एतत् कथितम्। अवसरेऽस्मिन् श्रीप्रधानेन अशेषे हि देशे शिक्षा-गुणवत्तायाः पाठ्यक्रमस्य च सुसमन्वयार्थं पीएम-ई-विद्या दूरभाष-अनुप्रयोगेन दीक्षा-द्वि-दशमलव-शून्येन सह अन्यप्रयासानां शुभारम्भो विहितः। श्रीप्रधानेन भारते शिक्षाक्षेत्रस्य प्रोन्नतये एनसीईआरटी-संस्थायाः भूमिकाऽपि प्रशंसिता।

---

**हॉकी**

हॉकी-प्रतिस्पर्धायां भारतदेशः अद्य सायंकाले बिहारराज्यस्य राजगीर-नगरे पुरुष-एशिया-कप-प्रतियोगितायाः पूल-ए इत्यस्य अन्तिमायां स्पर्धायां कज़ाकिस्तान-देशेन सह स्पर्धिष्यति एषा स्पर्धा सायं सार्धसप्तवादने प्रारप्स्यते। हरमनप्रीतसिंहस्य नेतृत्वे भारतीय-दलम् ह्यः जापानदेशं

त्रि–द्वे इत्यङ्कान्तरालेन पराजित्य “सुपर्–चतुर्थ” चरणे प्रविष्टवत्। एतावता भारतीय-दलेन द्वेऽपि स्पर्धे विजिते। सहैव भारतदलम् अङ्कतालिकायां शीर्षस्थाने वर्तते।

।। इति वार्ता:।।